# Naradaproktam Mrityunjayarchanamahimavarnanam

# નારદપ્રોક્તં મૃત્યુઞ્જયાર્ચનમહિમવર્ણનમ્

## Document Information

Text title : Naradaproktam Mrityunjayarchanamahimavarnanam

File name : mRRityunjayArchanamahimavarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shivarahasyam | harAkhyaH tRitIyAMshaH | uttarArdham | adhyAyaH 8 | 25-34 ||

Latest update : January 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 1, 2024

*sanskritdocuments.org*

# નારદપ્રોક્તં મૃત્યુઞ્જયાર્ચનમહિમવર્ણનમ્

જલધારા કલ્પનીયા શિવલિઙ્ગે શિવાત્મકે ।
મણિકાઃ પૂરણીયાશ્ચ સુગન્ધૈઃ શીતલૈર્જલૈઃ ॥ ૨૫॥

શિવાર્ચકાઃ કલ્પનીયાઃ શતશઃ શિવમન્દિરે ।
કરણીયં ચ તૈરેવ શિવલિઙ્ગસમર્ચનમ્ ॥ ૨૬॥

કસ્યચિત્ સ્યાત્ તદાલસ્યં નિદ્રાઽપિ સ્યાત્ કદાચન ।
અનાલસ્યૈઃ કારણીયમન્યૈરેવ શિવાર્ચનમ્ ॥ ૨૭॥

તોષણીયાશ્ચ તે સર્વે ધનૈર્ગોભિર્ગૃહૈરપિ ।
શિવનૈવેદ્યદાનૈશ્ચ દુકૂલૈર્ભૂષણૈરપિ ॥ ૨૮॥

શિવનામાનુસન્ધાનકથાશ્રવણપૂર્વકમ્ ।
કાલો વિનેયઃ સર્વોઽપિ નિદ્રાઽપિ સ્યાત્ કદાચન ॥ ૨૯॥

કિં ચ મૃત્યું સદા પશ્યન્ કો વા નિદ્રાં કરિષ્યતિ ।
મૃત્યુભીત્યા ન નિદ્રાઽપિ ભોજનેઽપિ રતિઃ કુતઃ ॥ ૩૦॥

કદા મરણમસ્ય સ્યાત્ કદા વા યમયાતના ।
ઇત્યેવ ચિન્તયા કિઞ્ચિત્ નીયતે દિનમાસ્તિકૈઃ ॥ ૩૧॥

નાસ્તિકાનાં તથા (તયા)જન્મ તેષાં ન શિવપૂજનમ્ ।
અતો મૃત્યુભયં તેષાં યાતનાભયમન્વહમ્ ॥ ૩૨॥

મૃત્યું તરતિ મર્ત્યોઽપિ મહામૃત્યુઞ્જયાર્ચનાત્ ।
અતો મૃત્યુઞ્જયો નિત્યં પૂજનીયઃ પ્રયત્નતઃ ॥ ૩૩॥

મૃત્યુઞ્જયાર્ચનેનૈવ યદિ સ્યાદાયુષઃ ક્ષયઃ ।
તદા તદાયુઃ સફલં તદન્યન્નિષ્ફલં ખલુ ॥ ૩૪॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે નારદપ્રોક્તં મૃત્યુઞ્જયાર્ચનમહિમવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । ઉત્તરાર્ધમ્ । અધ્યાયઃ ૮ -

આયુમૂર્તિશિવભક્ત્યુત્કર્ષવર્ણનમ્ । ૨૫-૩૪॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . uttarArdham . adhyAyaH 8 - AyumUrtishivabhaktyutkarShavarNanam . 25-34..

Proofread by Ruma Dewan

---

*Naradaproktam Mrityunjayarchanamahimavarnanam*

pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*